# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा – शास्त्री-1** | **सत्रम् – 1** | **गुणाः - 70** |
| **विषयः –** पुराणेतिहासः | **प्रश्नपत्रम् - 7 - CE - 1.1.1** | **समयः- 11:30 तः 2:30** |
| **दिनाङ्कः- 16/10/2019** | **संदर्भग्रन्थः –** श्रीमद् भागवते माहात्म्यं एवं प्रथमस्कन्धः | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. अहं भक्तिरिति ख्याता इमौ मे तनयौ मतौ ।
   ज्ञानवैराग्यनामानौ कालयोगेन जर्जरौ ।।
2. अट्टशूला जनपदाः शिवशूला द्विजातयः ।
   कामिन्यः केशशूलिन्यः सम्भवन्ति कलाहिव ।।
3. विरक्तो वैष्णवो विप्रो वेदशास्त्रविशुद्धिकृत् ।
   दृष्टान्तकुशलो धीरो वक्ता कार्योऽतिनिः स्पृहः ।।

**प्र-2 कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत। 10**

1. गोकर्णाख्यानं वर्णयत ।
2. भागवतश्रवणविधिं वर्णयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
   पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ।।
2. द्वापरे समनुप्राप्ते तृतीये युगपर्यये ।
   जातः पराशराद्योगी वासव्यां कलया हरेः ।।
3. तथाऽऽहृतं पशुवत् पाशवबद्धमवाङ्मुखं कर्मजुगुप्सितेन ।
   निरीक्ष्य कृष्णापकृतं गुरोः सुतं वामस्वभावा कृपया ननाम च ।।

**प्र-4 कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत। 10**

1. कुन्तीस्तुतिं वर्णयत ।
2. भीष्मस्तुतिं वर्णयत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 द्वयोः ससन्दर्भं व्याख्या कार्या। 10**

1. अग्निर्निसृष्टो दत्तश्च गरो दाराश्च दूषिताः ।

ह्रतं क्षत्रं धनं येषां तद्दत्तैरसुभिः कियत् ।।

2. वञ्चितोऽहं महाराज हरिणा बन्धुरूपिणा ।
   येन मेऽपहृतं तेजो देवविस्मापनं महत् ।
3. अहो वयं धन्यतमा नृपाणां महत्तमानुग्रहणीयशीलाः ।
   राज्ञां कुलं ब्राह्मणपादशौचाद् दूराद् विसृष्टं बत गर्ह्यकर्म ।।

**प्र-6 कस्याप्येकस्य निबन्धात्मकमुत्तरं लिखत । 10**

1. भगवतः श्रीकृष्णस्य द्वारकागमनवर्णनं कुरुत ।
2. भगवतः शुकदेवस्य स्वरूपवर्णनं कुरुत ।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-7 दशानां एकवाक्येन उत्तराणि लिखत । 10**

1. किं नाम पुराणम्
2. भागवतज्ञानं प्रथमं कः कस्मै अददत्
3. प्रथमस्कन्धे कति अध्यायाः
4. भागवते कति अध्यायाः
5. व्यासस्य मातुः नाम किम्
6. भागवतस्य प्रथमश्लोकस्य छन्दः किम्
7. भगवान् शुकदेवः कति वर्षात्मकः
8. आत्मदेवस्य ज्येष्ठः पुत्रः कः
9. भक्त्या पुत्रयोः नाम किम्
10. कुन्ती कस्य स्तुतिं करोति
11. पुराणलक्षणं किम्
12. अष्टादशपुराणानां नामात्मकः श्लोकः कः
13. अभिमन्योः पुत्रः कः
14. अभिमन्योः पत्न्याः नाम किम्
15. भागवते मुख्यश्रोता कः

*********